International Journal of Sanskrit Research 2022; 8(6): 28-30

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 28-30
© 2022 IJSR
www.anantaajournal.com
Received: 19-08-2022
Accepted: 22-09-2022

**Amlan Acharya**
Department of Sanskrit,
Pondicherry University
Kalapet, Puducherry, India

**CorrespondingAuthor:**
**Amlan Acharya**
Department of Sanskrit,
Pondicherry University
Kalapet, Puducherry, India

# अभिनवकाव्यालङ्कारसूत्रे काव्यलक्षणाध्ययनम्

**Amlan Acharya**

## प्रस्तावना

आचार्यराधावल्लभविरचितम् अभिनवकाव्यालङ्कारसूत्रं नवयुगीनकाव्यशास्त्रं वर्तते। इदं काव्यशास्त्रे सर्वत्र नवीनचिन्तनं परिलक्षते। एवं "लोकानुकीर्तनं काव्यम्" इति नवीनकाव्यलक्षणं प्रस्तौति आचार्यराधावल्लभः। अत्र काव्यं नाम लक्ष्यम्। तत्स्वरूपं लक्षयितुं यत् लक्षणं तन्नाम लोकानुकीर्तनम्। लक्षणे शब्दद्वयं वर्तते। लोकः अनुकीर्तनं च। अत्र लोकस्य त्रैविध्यं भणितमाचार्येण। अपि च अनुकीर्तनस्यापि चतस्रः अवस्थाः वर्तन्ते। लक्षणं इदम् अतीव गाम्भीर्यपूर्णं वर्तते। अतः शोधनिबन्धे अस्य लक्षणस्य विस्तृतमध्ययनं क्रियते।

## आचार्यराधावल्लभत्रिपाठीमहोदयस्य देश–काल–कृतिश्च

आचार्यः राधावल्लभत्रिपाठी मध्यप्रदेशराज्यस्य रायगढनगरे ब्राह्मणपरिवारे १५ फरवरी १९४९ तमे वर्षे जन्म अलभत। अस्य पिता पं. गोकुलप्रसादत्रिपाठी तत्कालीनसाहित्यस्य जगति प्रसिद्धः विद्वान् समीक्षकः च आसीत्। आचार्यराधावल्लभत्रिपाठीमहोदयस्य स्नातकोत्तरशिक्षणं सागरविश्वविद्यालये अभवत्। ततः एव तेन विद्यावारिधिः, D.Lit. इति उपाधिः स्वीकृतः तदनन्तरं तत्र सागरविश्वविद्यालयैव संस्कृतविभागाध्यक्षरूपेण कार्यम् अकरोत्। तेन आचार्येण राष्ट्रियसंस्कृतसंस्थानं, नवदेहेली इति विश्वविद्यालयस्य कुलपतिपदमपि विभूषितम्। आचार्यराधावल्लभत्रिपाठी संस्कृते स्वसाहित्यिकावदानाय विभिन्नराष्ट्रिय सम्मानैः अलङ्कृतो अभवत्। यथा – पी.वी. काणे स्वर्णपदकं, भोजपुरस्कारं, कालिदाससम्मानं इत्यादयः। तेषां आचार्याणां काव्यरचना विपुला अस्ति।

## अभिनवकाव्यालङ्कारसूत्रम्

अभिनवकाव्यालङ्कारसूत्रं साम्प्रतिकपरिप्रेक्षे नवीनं काव्यशास्त्रम् अस्ति। ग्रन्थोऽयम् अलंकारतत्वस्य पर्याप्तेः त्रिविधप्रक्रियायाः (आधिभौतिकम्, आध्यात्मिकम्, आधिदैविकं) च आधुनिकसन्दर्भे पुनर्व्याख्यां कृत्वा उपस्थापयति । संस्कृतकाव्यशास्त्रपरम्परायां काव्यतत्त्वानां व्यवस्थापनं पुनर्व्यवस्थापनं च सर्वदा एव अभवत्। दशम्यां शताब्द्यां राजशेखरभोजादिभिः संपूर्णकाव्यशास्त्रस्य पूनर्व्यवस्थापनायाः प्रयासः कृतः। आधुनिककालेपि एतादृशाः प्रयासाः क्रियमाणाः सन्ति। अभिनवकाव्यालङ्कारसूत्रमपि तस्य उदाहरणं वर्तते। ग्रन्थोऽयं वामनपद्धत्या सूत्र–वृत्ति–उदाहरणश्लोकरीत्या लिखितम्। विषयविवेचनपद्धतिदृष्ट्या वामनानुगतत्वेनैव स्वोपज्ञं काव्यशास्त्रमसौ अभिनवकाव्यालङ्कारसूत्रमित्यभिधत्ते। अभिनवकाव्यालङ्कारसूत्रं त्रिषु अधिकरणेषु विभक्तमस्ति।

## अभिनवकाव्यालङ्कारसूत्रे काव्यलक्षणाध्ययनम्

नित्यं नवीनचिन्तनं विदुषां स्वभावः एव। अतः अद्यापि एषा लक्षणपरम्परा अविच्छिन्नरूपेण प्रवहति। विशंतिशताब्द्याम् अलङ्कारस्य काव्यात्मरूपेण प्रतिष्ठापनाय अलङ्कारस्य नवीनप्रवाहः दृश्यते। प्रथमतया आचार्यरेवाप्रसादद्विवेदी काव्यालङ्कारकारिकायाम् अलङ्कारं काव्यस्यात्मा रूपेण प्रतिपादितमस्ति। अनन्तरम् अभिनवकाव्यालङ्कारसूत्रकारः राधावल्लभत्रिपाठी। तेन आचार्येण अतीवगाम्भिर्यपूर्णं काव्यलक्षणं प्रदत्तम् – "लोकानुकीर्तनं काव्यम्" इति। सः "सर्वेषां सर्वमादाय सर्वेषां च सर्व विहाय" इत्यस्य प्रवर्तकः। सर्वस्यापि समीक्ष्य ग्रहणं , गृहीतस्य च परिष्कृत्य प्रतिपादनं कृतम्।

ग्रन्थारम्भे आचार्येण "अथ" शब्दस्य प्रयोगं कृत्वा मङ्गलाचरणपरम्परायाः पालनं कृतम्। सः व्यास–भरत–भामहादि पूर्वाचार्याणां स्मरणमपि कृतवान्। तदनन्तरं प्राचीनाचार्याणां काव्यलक्षणं परिशील्य काव्यं प्रति अग्रे गच्छति – "चेत्थं प्राचां तानि तानि काव्यलक्षणानि परिशील्य काव्यलक्षणमिदं पुरस्क्रियते"। "लोकानुकीर्तनं काव्यम्" इति आचार्यस्य काव्यलक्षणम्। लक्षणे अस्मिन् शब्दद्वयं वर्तते – १. लोकः २. अनुकीर्तनम्। अस्य शब्दद्वयस्य गाम्भिर्यपूर्णं व्याख्या आचार्येण कृता। तद् विषये अत्र विचारं कुर्मः।

**1. लोकः**

लोकः शब्दस्यार्थः विविधग्रन्थेषु भिन्नं भिन्नम् अस्ति। तेषु केचित् अत्र प्रस्तुयन्ते।

नाट्यशास्त्रे अभिनवगुप्तस्य अभिनवभारतीटीकायां – लोको नाम जनपदवासी जनः। जनपदश्च देशः।[1]

काव्यप्रकाशकारः मम्मटः – स्थावरजङ्गमात्मको लोकः।[2]

आचार्यत्रिपाठी काव्यशास्त्रीयपरम्परायां लोकस्य नूतनां विस्तृतव्याख्यां च प्रस्तौति। तेन मम्मटादिना उक्तं लोकस्य स्वरूपम् अस्वीकृतम्। तस्य मतानुसारेण लोकः न केवलं स्थावरजङ्गमात्मकम् अपितु यत् किमपि चेतनशक्त्या चर्मचक्षुषा च दृश्यते तत् सर्वमपि लोकः। अपि च अयं लोकः न स्थिरः अपितु प्रतिक्षणं परिवर्तमानः। प्रसङ्गवशात् लोकशब्दस्य व्यवहारः सङ्कुचितार्थे अपि भवति। यथा "अमरकोशे लोकोऽयं भारतवर्षः"। अतः भारतदेशात् बहिरपि लोकः कथने अतिव्याप्तिः न मन्तव्या। तदनन्तरं सः स्वयमेव शङ्कां दर्शयति यत् परब्रह्मणः सत्ता तु अलौकिकं या श्रुतौ वर्णिता अचक्षुरवाङ्मनसगोचरमित्यादिकथनैः। तर्हि परब्रह्मणः सत्ता कथं लोके अन्तर्भवति ? अस्याः शङ्कायाः निवारणाय उक्तम् –

आब्रह्मस्तम्बावधि लोकः प्रसृतः सनातनोऽक्षय्यः।
लोकाद् बहिर्न किञ्चिल्लोके सर्वं प्रतिष्ठितं च।।[3]

आचार्यस्य मतानुसारेण या श्रुतौ वर्णिता सा तु सर्वथा अलौकिकी एव तन्न। तदपि न लोकातिक्रान्तम्। तत् सिद्धये उक्तम् – "अथ ये महायोगिनः समाधिषु वयं परब्रह्मप्रमोदार्णवं साक्षात्कुर्म इति ख्यापयन्ति, तान् इदं पृच्छामः। तस्य परब्रह्मणः साक्षात्कारोऽत्रभवद्भिरस्मिन् लोके स्थित्वा क्रियते, अन्यत्र गत्वा वा ? यदि अस्मिन् लोके क्रियते तर्हि सिद्धमेव लोकान्तर्वतित्वं तस्य ब्रह्मणः"।

पूर्वाचार्यैः यत् काव्यस्य लोकोत्तरता वर्णिता तदपि तेन खण्डिता। पूर्वाचार्याणां लोकोत्तरता विषये कथनं यथा –

- लोकोत्तीर्णेन रूपेणावस्थानमित्यमेवालंकारभावः – अभिनवगुप्तः
- लोकोत्तरचमत्कारिवैचित्र्यसिद्धये – कुन्तकः
- काव्यं लोकोत्तरवर्णनानिपुणस्य कवेः कर्म – मम्मटः

पूर्वकाव्यशास्त्रीयाणां लोकोत्तरत्वम् आचार्यराधावल्लभेन परिष्कृत्य स्वीकृतम्। तस्य मतेन उपरोक्तोक्तिषु यत् लोकशब्दस्य प्रयोगः अस्ति तत्तु आधिभौतिकमेव। आधिभौतिकजगत् तु काव्यस्य आधारमात्रमेव। काव्यं नाम न केवलम् आधिभौतिकस्य निरूपणम्। किन्तु काव्यं तु तदपि अतिक्रमति। अतः लोकोत्तरत्वम्। पूर्वकाव्यविद्भिः यत् लोकोत्तरम् उक्तम्, आचार्यत्रिपाठी मते तत् असाधारणं,असामान्यं, विशेषः वा। अपि च तेन लोकस्य त्रैविध्यं कृतम्। स च लोकस्त्रिविधः –

**आधिभौतिकलोकः** "इदं पञ्चभूतात्मकं जगत् अन्तर्बाह्यकरणैरनुभूयमानं तावदाधिभौतिकम्। पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशः। अग्निर्वायादित्यश्चन्द्रमा नक्षत्राणि। आप औषधयो वनस्पतय आकाश आत्मा"। एवं प्रकारेण पञ्चभूततत्त्वानां, तेभ्यः उत्पन्नानां वस्तुनाम् अपि ग्रहणम् आचार्यैः अस्मिन् लोके कृतम्। काव्यस्य निर्माणे एतेषां सर्वेषां वस्तुनां ग्रहणं तु भवति एव। अतः आधिभौतिकजगत् काव्यस्य निर्माणे आधारभूतम्।

**आधिदैविकलोकः** मनुष्याणां मानसगतो लोक आधिदैविकम्। चर्मचक्षुषा यत् किमपि दृश्यते तत्तु न वास्तविकः यथार्थः वा। यथार्थवस्तुनः ज्ञानं ज्ञानेन्द्रीयेण भवति। नेत्रैः दृशयमानस्य लोकस्य मानसगतलोके अति विस्तारं भवति। अतः अयमपि काव्यस्य विषयः वर्तते।

**आध्यात्मिकलोकः** चर्मचक्षुषा गृह्यमाणो ज्ञानम् आधिभौतिकं, मनसागृह्यमाणो ज्ञानम् आधिदैविकं, तथा यत् ज्ञानं चेतनया गृह्यते तत् आध्यात्मिकम् अस्ति। एतत् विषये आचार्यराधावल्लभः आह – "वस्तुमात्रस्य प्रतीयमानं स्वरूपमेव तस्याऽऽत्मा। तस्मिन्नात्मनि यत् स्यात् तदध्यात्मम्। अत एव वस्तुनः आन्तरिकं रूपमेवाध्यात्मम्"।

एतत् आधिभौतिक–आध्यात्मिक–आधिदैविकलोकत्रयाणाम् अनुकीर्तनं काव्यम्। काव्ये लोकत्रयाणाम् उपस्थितिः भवति समष्टिरूपेण। अथ आचार्यराधावल्लभः आह – "अनुषक्तत्वं चैतेषां त्रयाणामपि"। न तत्र केवलम् आधिभौतिकलोकस्य वर्णनं काव्यम्। परन्तु काव्ये त्रयाणां लोकानां स्थिते अपि कस्यापि एकस्य प्राधान्यं वर्तते। यथा आचार्येण उदाहृतं – कालिदासस्य मालविकाग्निमित्रम्। अस्मिन् काव्ये आधिभौतिकलोकस्य प्रधानता दृश्यते। विक्रमोर्वशीये नाटके कवेः कल्पनायाः प्राचुर्यत्वात् आधिदैविकलोकस्य प्राधान्यं दृश्यते। तथा हि योगी अरविन्दस्य सावित्री महाकाव्ये आध्यात्मिकलोकस्य प्राधान्यं दरीदृश्यते।

कस्यापि एकस्य लोकस्य ऋते न अपरस्य अवस्थितिः सम्भवति। एतत् लोकत्रयं मिलित्वा पुरुषार्थचतुष्टयं सिद्धयन्ति। आधिभौतिकलोकात् अर्थस्य, आधिदैविकलोकात् कामस्य, आध्यात्मिकलोकात् धर्म अर्थस्य च प्राप्तिः भवति। अर्थं कामस्य च ऋते धर्मः न सम्भवति, तथा च धर्मार्थकामान् विना मोक्षः न सम्भवति। अतः यथा पुरुषार्थचतुष्टयं परस्पराश्रयेण तिष्ठन्ति, तथैव काव्ये लोकत्रयम् अपि। आधिभौतिक–आधिदैविक–आध्यात्मिक जीवनम् अनुसृत्य काव्यस्य रचना भवति। जीवन निरूपणस्य प्रक्रिया एव अनुकीर्तनमुच्यते। उक्तम् आचार्यत्रिपाठीमहाभागेन – "जीवनं तु पुरुषार्थचतुष्टयसमन्वितमेवाऽखण्डतां सम्पूर्णतां च धत्ते। तेनैव जीवनस्याऽलङ्कारः परिपूर्णता वा"।

**2. अनुकीर्तनम्**

काव्यलक्षणे प्रयुक्तस्य लोकशब्दस्य अपूर्वव्याख्या आचार्यैः कृता या काव्यशास्त्रे नूतना अस्ति। काव्यलक्षणस्य अपरं पदमस्ति 'अनुकीर्तनम्'। भरतस्य नाट्यलक्षणे यत् अनुकीर्तनशब्दस्य प्रयोगः अस्ति तत्तु केवलम् अवस्थामात्रस्य अनुकरणम्। किन्तु त्रिपाठीवर्यैः यत् अनुकीर्तनमुक्तं तत् किमपि विलक्षणं तत्त्वम्। तस्य विषये विचारयामः।

अत्र 'अनु' उपसर्गः पश्चात् अर्थे प्रयुक्तः। अतः अनुकीर्तनम् इत्युक्ते पश्चात् कीर्तनम्। कस्य अनुकीर्तनम् ? लोकस्य। लोकस्य पूर्ववर्तित्वं काव्यस्य पश्चाद्वर्तित्वं च नियतम्। शब्दमाध्यमेन लोकस्य पुनराविष्करणम् अनुकीर्तनम्। शब्दाश्च भवन्ति सार्थाः। अत्र आचार्यैः शब्दार्थयोः सहभावं स्वीकृतम्। आचार्यत्रिपाठीवर्यः अनुकीर्तनं पदेन अत्र पूर्वाचार्याणां दोषरहितं, गुणसहितं, सालङ्कारः, रसाभिव्यञ्जकश्च शब्दार्थयोः ग्रहणं कृतवान्। अस्य अनुकीर्तनेन काव्ये पूर्णता भवति। इयं पूर्णता एव अलङ्कारः। अलङ्कारस्य विषये काव्यात्मनिरूपणाध्ययनं प्रसङ्गे विचारयामः। पुनश्च अनुकीर्तनस्य चतस्रः अवस्थाः वर्तन्ते यस्मात् काव्ये पूर्णता आयाति। ते सन्ति – अनून्मिलनम्, अनुदर्शनम्, अनुभवोऽनुव्याहरणं चेति। अत्र काव्यस्य निष्पन्ना पद्धतिः अपि आचार्येण व्याख्याता। यतो हि लोकस्य पूर्ववर्तीत्वात् अनुकिर्तिनस्य अवस्थाचतुरमपि 'अनु' उपसर्गेण उक्तम्।

- अनून्मीलनम् – एतेषां त्रयाणामाधिभौतिकाधिदैविकाध्यात्मिकलोकानां सकलः समुल्लासो जीवनम्। तस्य जीवनस्य कवयितुर्मानसे प्रथम उन्मेषो नाम अनून्मीलनम्।
- अनुदर्शनम् – उन्मिषितायास्तस्याः कवयित्रा स्वान्तश्चेतसि दर्शनमेव अनुदर्शनम्।
- अनुभवः – अनुदृष्टायाः तस्या वर्णनाय वस्तुनो रूपस्य शब्दार्थयोर्वाऽऽविष्कारो अनुभवः।

[1] ना.शा. १६६६ व्याख्याने
[2] का.प्र. १.३
[3] अभि.का.सू. पृ. ३

- अनुव्याहरणम् – अनुभूतायाः तस्याः स्फुटैः शब्दैः प्रकटीकरणम् अनुव्याहरणम्।

अनुकीर्तनस्य यत् चतस्रो अवस्था तत्तु श्रुतिसम्मतमिति आचार्यः भणति। श्रुतौ वाक् तत्वस्य चतस्रः अवस्थाः विषये उल्लेखः अस्ति –
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणीङ्गिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।[4]
ते सन्ति – परा, पश्यन्ती, मध्यमा, बैखरी। एतेषु प्रथमतिस्रावस्था मानसगताः सन्ति। बैखरी अनुव्याहरणं वा मनुष्याणां वाग्व्यवहारस्य विषयः अस्ति। अनुव्याहरणेन काव्यस्य अभिव्यक्तिर्जायते।




अत्र मनसि एकः प्रश्नः जायते यत् 'अनूकीर्तन' शब्दः आचार्येण कुतः उद्धृतः ? वस्तुतः आचार्यराधावल्लभः भट्टतौतस्य रचनाप्रक्रिया अत्र उपस्थापिता –

नानृषिः कविरित्युक्त ऋषिश्च किल दर्शनात्।
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्।
दर्शनाद् वर्णनाच्चाथ लोके रूढा कविश्रुतिः।
नोदिता कविता तावत् यावज्जाता न वर्णना।।[5]

दर्शनं वर्णनं चेति द्विविधा काव्यरचनाप्रक्रिया भट्टतौतेन वर्णिता। दर्शनवर्णनयोः सहभावेन काव्यस्य अभिव्यक्तिर्जायते। आचार्यराधावल्लभः भट्टतौतस्य तामेव प्रक्रियां परिष्कृत्य चतुर्विधा अनुकीर्तनमुक्तम्। एतेषां चतुर्विधनुकीर्तनेन(अनून्मीलनानुदर्शनानुभवानुव्याहरणेन) त्रिविधलोकैः(आधिदैविकाधिभौतिकाध्यात्मिकलोकैः) काव्यजगति पूर्णता आयाति। पूर्णाता एव अलङ्कारः। अलङ्कारः एव काव्यम्। यथा आह राधावल्लभः – तेनास्य पूर्णता। पूर्णता चालङ्कारः। तेन अलङ्कार एव काव्यम्। [6]
काव्यलक्षणस्य व्याख्यानानन्तरं प्रश्नत्रयं स्वयमेव आचार्येण उत्थापितम्। ते सन्ति –

- साहित्यं समाजस्य दर्पणम् अस्ति। यथा समाजस्य दर्पणे प्रतिबिम्बनं भवति तथा काव्ये अपि चेत् किम् विशिष्टमिदम् ?
- लोकः तु शुभाशुभात्मकः। तर्हि काव्यम् उभयस्यानुकारी अस्ति अथवा केवलं शुभस्य वा ?
- काव्यस्य लक्षणमिदं व्यासभरतभामहदण्डिमम्मटानां लक्षणानि निराकरोति प्रस्तौति वा ?

एतेषां प्रश्नत्रयाणां विश्लेषणं कृतम् आचार्येण। वस्तुतः दर्पणः समाजस्य वाह्यरूपं प्रतिबिम्बयति। किन्तु साहित्यरूपीदर्पणं तथा नास्ति। साहित्यः तु समाजस्य आभ्यन्तरं सुक्ष्मरूपं चापि प्रकाशयति। दर्पणः भौतिकजगत् प्रतिफलयति। काव्यम् आधिदैविकाध्यात्मिकं च जगतं स्फुरयति। अतः काव्यस्य वैशिष्ट्यम्।
लोके शिवाशिवौ उभयस्य अवस्थितिः वर्तते। अतः काव्यं तदुभयस्य अनुकीर्तनं करोति। काव्यम् अशिवस्य निराकरणाय एव अशिवस्य निरूपणमपि करोति। यावत्पर्यन्तम् अशिवस्य परिचयो न भविष्यति तावत् तस्य निराकरणं कथं भविष्यति ?

## उपसंहार

"लोकानुकीर्तनं काव्यम्" इति काव्यलक्षणे समेषां भरतमम्मटादिनां काव्यलक्षणं क्रोडिकृतमाचार्येण। अत्र लोकपदेन भरतस्य काव्यलक्षणं गृहीतं तथा च अनुकीर्तनपदेन भामहमम्मटादीनां शब्दार्थप्रधानकाव्यलक्षणं क्रोडिकृतम्। एवमेव आचार्यराधावल्लभेन व्यापककाव्यलक्षणं प्रदत्तम्।

## संकेताक्षरसूची

ना.शा.– नाट्यशास्त्रम्
का.प्र.– काव्यप्रकाशः
अभि.का.सू.– अभिनवकाव्यालङ्कारसूत्रम्
ऋ.वे.– ऋग्वेदः

## सन्दर्भ सूची

1. अभिनवकाव्यालङ्कारसूत्रम्, त्रीपाठी पो. राधावल्लभ, वाराणसी, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः, २००५।
2. अभिनवकाव्यालङ्कारसूत्रं सालोचनं विमर्शः, पण्ड्या प्रवीण, जयपुर, राष्ट्रीय संस्कृत साहित्य केन्द्र, २०१६।
3. आधुनिकसंस्कृतकाव्यशास्त्रसमीक्षणम्, पाण्डेयः डा. रमाकान्तः, जयपुर, जगदीश संस्कृत पुस्तकालय, २००६।
4. संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र, मिश्र अभिराज राजेन्द्र, वाराणसी, विश्वविद्यालय प्रकाशन, २०१०।
5. संस्कृत काव्यशास्त्र और काव्य–परम्परा, त्रिपाठी प्रो राधावल्लभ, दिल्ली, प्रतिभा प्रकाशन, , १९८१।

[4] ऋ.वे, १.१६४.४५
[5] अभि.का.सू, पृ,८
[6] अभि.का.सू, पृ, ७